प्रयुक्तव्यवहारविषयस्य खड्गकुन्तधनुरादेर्व्याघ्रादिज्ञानालम्बनत्वप्रसङ्गात्। नापि फलेऽन्यथात्वम् फलस्य स्फुरणस्य भ्रान्तौ सम्यग्ज्ञाने वा स्वरूपतो वैषम्यादर्शनात्। वस्तुन्यपि कथमन्यथात्वं किं शुक्तिकायां रजततादात्म्यं किंवा रजताकारेण परिणामः। आद्येऽपि किं शुक्तिरजतयोरत्यन्तभेदः किंवा भेदाभेदौ। नाद्यः। अत्यन्तभिन्नयोर्वास्तवतादात्म्यासम्भवात् अनिर्व्वचनीयस्य त्वया अनभ्युपगमात् शून्यतादात्म्यप्रतीतौ च गुणगुण्यादावपि तत्सम्भवेन भ्रान्तित्वं दुर्व्वारम्। समवायस्य च प्रक्रियामात्रसिद्धस्य तादात्म्यानतिरेकात्। भेदाभेदपक्षे तु खण्डो गौरितिवदभ्रान्तिः स्यात्। परिणामपक्षेऽपि बाधो न स्यात्। विमतं रजतज्ञानमबाध्यं परिणामज्ञानत्वात् क्षीरपरिणामदुग्धज्ञानवत्। अतः क्षीरवदेव शुक्तिर्न पुनर्बाध्येत। ननु कमलमुकुलविकाशरूपपरिणामहेतोः सूर्य्यतेजसोऽपगमे पुनर्मुकुलीभाववद्रजतपरिणामहेतोर्दोषस्यापगमे पुनः शुक्तिभावोऽस्तु इति चेत् नैवं विकसितमेव मुकुलमासीदितिवत् रजतमेव शुक्तिरासीदिति प्रतीत्यभावात् कथञ्चित् तद्भावेऽपि न परिणामपक्षो युक्तः निर्दोषस्यापि रजतप्रतीतिप्रसङ्गात् नचैकमेव क्षीरं दधिरूपेण कञ्चित् पुरुषं प्रति परिणतमन्यं प्रति नेति दृष्टचरं तस्मान्नान्यथाख्यातिः सुनिरूपा। ज्ञानलक्षणया देशान्तरगतरजतभानन्तु साक्षात्करोमीति साक्षात्कारोल्लेखिबुद्धेरन्यथानुपपत्त्या न सम्भवतीति द्रष्टव्यम्। किञ्च ज्ञानलक्षणायाः प्रत्यासत्तित्वे तथैव पर्व्वते वह्निज्ञानसम्भवेनानुमानादेरुच्छेदः स्यात् अनुव्यवसायात्तत्सत्त्वकल्पने तु प्रकृतेऽपि साक्षात्कारानुव्यवसायसत्त्वेन तुल्यत्वात्। आत्मख्यातिरिति बौद्धाः। तथाहि सर्व्वासां बुद्धीनां विषयमन्तरेणापि तदाकारोल्लेखसम्भवेन रजतज्ञानमपि बुद्धिरूपतया न विषयान्तरमपेक्षते इत्यात्मनः बुद्धेरेव ख्यातिः प्रतिभासः "सहोपालम्भनियमादभेदो नीलतद्धियोः। भेदश्च भ्रान्तिविज्ञानैर्दृश्येतेन्दाविवाद्वयः। अविभागोऽपि बुद्ध्यात्मा विपर्य्यासितदर्शनैः। ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते" इति तेषां सिद्धान्तात्। तथाच विमतं रजतं बुद्धिरूपं चक्षुरादिसंप्रयोगं विनाऽप्यपरोक्षत्वात् सम्मतबुद्धिवत् इत्यनुमानेन रजतादेस्तद्रूपतासिद्धिः। ते हि मन्यन्ते शब्दस्पर्शरूपरसगन्धविषयाः सुखादिविषयाश्च षडपि प्रत्ययाः आलम्बनसमनन्तरसहकार्य्यधिपतिरूपान् प्रत्ययपदवाच्यान् चतुरो हेतूनपेक्ष्यैव उत्पद्यन्ते। तत्र नीलावभासरूपस्य चित्तरूपज्ञानस्य नीलालम्बनवतो नीलाकारता भवति। समनन्तरप्रत्ययात् पूर्व्वतनज्ञानवासनारूपात् बोधरूपता, सहकारिप्रत्ययादालोकात् स्पष्टतावभासः। चक्षुरादेरधिपतिप्रत्ययात् विषयप्रतिनियम इति। तत्रेदमुच्यते प्रकृते न तावत् सहकारिप्रत्ययाख्यादालोकात् रजताकारोदयो भवति तस्य स्पष्टतामात्रहेतुत्वात्। नाप्यधिपतिप्रत्ययाख्याच्चक्षुरादेः सम्भवति तस्य विषयविशेषं प्रत्येव नियमनमात्रहेतुत्वात्। नापि समनन्तरप्रत्ययाख्यात् पूर्व्वज्ञानात्। विजातीयघटादिज्ञानानन्तरं विजातीयरजतभ्रमोदयप्रसङ्गात्, नाप्यालम्बनप्रत्ययाख्याद्बाह्यार्थाद् भवति। विज्ञानवादिभिस्तस्यानङ्गीकारात्। ततश्च रजतादिबाह्यार्थासत्त्वे विज्ञानस्य कथं रजताकारतासमर्पणम्। संस्कारसामर्थ्येन तत्कल्पनेऽपि न निस्तारः संस्कारस्य क्षणिकस्थायित्वविकल्पासहत्वात्। तथाहि स्थायित्वे सिद्धान्तहानिः। क्षणिकत्वे पूर्वानुभवोत्तरमुत्पन्नस्य तस्य द्वितीयक्षणे नाशात् रजताकारोल्लेखसमये तस्यासत्त्वात् कथं तेन तदाकारोल्लेखः सम्भवति। किञ्च संस्कारस्य विज्ञानातिरिक्तत्वे क्षणिकविज्ञानमात्रसिद्धान्तहानिः। अथानादिज्ञानसन्ततौ यदा कदाचित् पूर्व्वं रजतज्ञानमुत्पन्नं तदेव संस्कार इत्यङ्गीक्रियते स च यद्यपि विजातीयानेकज्ञानव्यवहितः तथापि कदाचित् सजातीयं ज्ञानान्तरमुत्पादयत्येव यथा ब्रीहिवीजमनेकाङ्कुरादिकार्य्यव्यवधानेऽपि कदाचित् सजातीयान्तरमुत्पादयति तद्वत्। अथ न पूर्व्ववीजादुत्तरवीजोत्पत्तिः किन्तु पूर्व्ववीजजन्याङ्कुरसन्तानादेव तदुत्पत्तिरिति चेत् तर्ह्यत्रापि पूर्व्वरजतज्ञानजन्यज्ञानसन्तान एव संस्कारोऽस्तु अतो न सिद्धान्तहानिः। एवं पूर्व्वरजतज्ञानमपि ततः पूर्व्वतररजतज्ञानादुत्पद्यते ततोऽनादिवासनार्पितं रजतं बुद्धिरूपमेव सत् भ्रान्त्या बहिर्वदवभासते इति चेत् अत्रोच्यते वेदान्तिभिः, किं तद्रजतमलौकिकं लौकिकं वा अलौकिकत्वेऽपि किं जन्मरहितम् उत लौकिकरजतवदेव जायते। अलौकिकत्वे जन्मरहितत्वे च जायमानस्य ज्ञानस्य रूपं न स्यात्। द्वितीयेऽपि किं बाह्यार्थात् जायते, उत ज्ञानात् नाद्यः तैर्बाह्यार्थानङ्गीकारात् ज्ञानादेव तदुत्पादाभ्युपगमे दुष्टकरणजन्यज्ञानादुत्पादो वाच्यः तथा च जनकस्य पूर्व्वसत्त्वनियमेन तज्जनिका प्रतीतिः न रजतं गृह्णीयात् वर्त्तमानपदार्थस्यैवाकारार्पकत्वनियमात् क्षणिकयोर्जन्यजनकयोर्भिन्नकालीनत्वेन रजतस्यापरोक्षकाले पूर्व्वज्ञानस्यासत्त्वात्